**मुख्यवार्ता:**

- विदेश-मंत्रालयः अद्य प्रोक्तवान् यत् यमने निमिशा-प्रिया-प्रकरणं संवेदनशीलविषयः अस्ति भारत-सर्वकारः च अस्मिन् प्रकरणे यथासम्भवं साहाय्यं प्रदास्यति ।
- इन्दौर्-नगरं पुनः एकवारं निरन्तरं अष्टमे वर्षे भारतस्य स्वच्छतम-नगरस्य उपाधिम् अध्यगच्छत् सूरत-नगरं च द्वितीयं स्थानं प्राप्नोत्।
- राष्ट्रपतिना द्रौपदी-मुर्मु-वर्यया अष्टसप्ततिः स्वच्छ-सर्वेक्षण-पुरस्कारः प्रदत्ताः।
- केन्द्रीय-मंत्री डॉ. जितेन्द्र-सिंहः अद्य प्रोक्तवान् य़त् विगतेषु एकादशवर्षेषु सर्वकारेण न्यूनातिन्यूनाः षोडश-शतं नियमाः समाप्ताः कृताः ये नागरिक-केंद्रिताः न आसन् ।
- भारतीय-ऋतु-विज्ञान-विभागेन अद्य मध्यप्रदेशस्य उत्तरप्रदेशस्य च केषुचित् भागेषु प्रचण्डवृष्टेः रेडअलर्ट इति रक्त वर्णीया सञ्चेतना प्रसारितास्ति। अद्य आन्ध्रप्रदेशस्य, केरलस्य, लक्षद्वीपस्य च एकान्तस्थानेषु प्रचण्डवायोः संभावना विद्यते।
- चतुरङ्गक्रीडायां फ्रीस्टाइल-ग्रैण्ड-स्लैम इत्यस्मिन् भारतस्य ग्रैण्डमास्टर इति सर्वोत्कृष्ट-क्रीडकः आर् प्रज्ञानन्दः लास्-वेगस् इत्यत्र कार्लसन् मैग्नस् इत्येतं पराजित्य उपान्त्यचक्रे प्राविशत् ।

**विदेश-मंत्रालयः-निमिषाप्रिया**

विदेश-मंत्रालयः अद्य प्रोक्तवान् यत् यमने निमिशा-प्रिया-प्रकरणं संवेदनशीलविषयः अस्ति भारत-सर्वकारः च अस्मिन् प्रकरणे यथासम्भवं साहाय्यं प्रदास्यति । मंत्रालयस्य प्रवक्ता रणधीर-जायसवालः अद्य अपराह्णे नव-दिल्ल्यां प्रसारमाध्यमान् सम्बोधयन् प्रोक्तवान् यत् भारतेन विधिसाहाय्यं प्रदत्तम् अस्ति सहैव परिवारस्य सहायतायै एकस्य अधिवक्तृणः नियुक्तिः अपि कृता अस्ति । सः प्रोक्तवान् यत् सर्वकारः एतत् प्रकरणं निराकर्तुं स्थानीयैः अधिकारिभिः परिवारस्य सदस्यैः च सह निरन्तरं सम्पर्कं स्थापयति । मन्त्रालयस्य प्रवक्ता अकथयत् यत् , यमने स्थानीयैः अधिकारिभिः निमिषायाः अस्य मासस्य षोडशदिनाङ्के निर्धारितस्य न्यायिकदण्डस्य स्थगनं कृतमस्ति । सः प्रोक्तवान् यत् नवदिल्ली अस्मिन् प्रकरणे निरन्तरं समीक्षति यथासम्भवं साहाय्यं च प्रयच्छति ।

**स्वच्छता-सर्वेक्षणम्**

इन्दौर्-नगरं पुनः एकवारं निरन्तरं अष्टमे वर्षे भारतस्य स्वच्छतम-नगरस्य उपाधिम् अध्यगच्छत्। केन्द्रसर्वकारस्य वार्षिक-स्वच्छता-सर्वेक्षणे सूरत-नगरं द्वितीयं स्थानं , नवी-मुम्बई-नगरं च तृतीयस्थानं प्राप्नुताम् । स्वच्छ-सर्वेक्षणस्य नवमस्य संस्करणस्य पुरस्काराः अद्य नवदिल्ल्यां आयोजिते समारोहे राष्ट्रपतिना द्रौपदी-मुर्मु-वर्यया प्रदत्ताः। अस्मिन् अवसरे प्रवोचन्ती राष्ट्पतिवर्या प्रकाशितवती यत् स्वच्छता विकसित-भारत-लक्ष्यम् इत्यस्य महत्वपूर्ण-विषयाणाम् अन्यतमा वर्तते सहैव सा भारतं स्वच्छं, स्वस्थं,विकसितं च कर्तुं देशवासिभ्यः आग्रहं कृतवती । त्रि-तः दश-लक्षपर्यन्तं जनसङ्ख्या-युतानां नगराणां वर्गे, नोयडा-नगरं स्वच्छतमं नगरम् इति रूपेण समुद्भूतम्, तदनन्तरं चण्डीगढ-मैसूरु-नगरे स्तः। दश- लक्षतः अधिक-जनसङ्ख्यायुतानां नगराणां वर्गे अहमदाबादनगरं प्रथमस्थानं प्राप्नोत्। कार्यक्रमे विविधवर्गेषु आहत्य अष्टसप्तति-पुरस्काराः प्रदत्ताः। अस्मिन् वर्षे, चतुर्षु वर्गेषु पुरस्काराः प्रदत्ताः, यथा सूपर-स्वच्छ-लीग-नगराणि, पञ्च भिन्न-जनसंख्या-वर्गेषु शीर्षत्रयं स्वच्छतमानि नगराणि च । स्वच्छ-सर्वेक्षणं इत्यस्मिन् मध्यप्रदेशस्य अष्टनगराणि विविधवर्गेषु पुरस्कारान् प्राप्नुवन् । इन्दौर-नगरं निरन्तरं अष्टमवारं देशस्य स्वच्छतमं नगरम् अभवत् । सूपर-स्वच्छ-लीग् इत्यस्मिन् वर्गे एतत् प्रथमस्थानं प्राप्नोत्। स्वच्छतापुरस्कारस्य घोषणायाः अनन्तरं नगरे उत्सवस्य वातावरणम् अस्ति, जनाः परस्परं अभिनन्दनं कुर्वन्तः सन्ति। स्वच्छतमेषु नगरेषु भोपाल-नगरं द्वितीयं स्थानं प्राप्नोत् । एतदतिरिच्य उज्जैन, बुधनी, देवास, शाहगञ्ज, जबलपुर, ग्वालियर चेत्यादीनि नगराणि विभिन्नेषु वर्गेषु पुरस्कारान् आप्नुवन् । इन्दौर-नगरस्य महापौरः पुष्यमित्र-भार्गवः नागरिकाणाम् अभिनन्दनं विधाय सर्वेषां स्वच्छता-मित्राणां स्वागतार्थं तेषाम् आह्वानं कृतवान् ।

**ओडिशा-जितेन्द्र-सिंहः**

केन्द्रीय-मंत्री डॉ. जितेन्द्र-सिंहः अद्य प्रोक्तवान् य़त् विगतेषु एकादशवर्षेषु सर्वकारेण न्यूनातिन्यूनाः षोडश-शतं नियमाः समाप्ताः कृताः ये नागरिक-केंद्रिताः न आसन् । अद्य अपराङ्णे भुवनेश्वरे केंद्र-सर्वकारस्य ओडिशा-सर्वकारस्य च प्रशासनिक-संशोधन-लोक-समाधान-विभागद्वारा संयुक्तरूपेण 'सुशासन-प्रथा' इत्यस्स्मिन् विषये आयोजितस्य दिवसद्वयस्य राष्ट्रीय-सम्मेलनस्य उद्घाटनं कुर्वन् , डॉ. सिंहः पारदर्शितया, भ्रष्टाचारविरुधोपायैः, सुव्यवस्थित-प्रशासनेन च नागरिकाणां जीवनं सरलं कर्तुं सुशासने बलम् अयच्छत् ।

**ऋतुविज्ञानविभागः-केरलः**

भारतीय-ऋतु-विज्ञान-विभागेन अद्य मध्यप्रदेशस्य उत्तरप्रदेशस्य च केषुचित् भागेषु प्रचण्डवृष्टेः रेडअलर्ट इति रक्त वर्णीया सञ्चेतना प्रसारितास्ति। आगामिदिनत्रयाणां कृते केरल-माहे-दक्षिण-कर्नाटकान्तरिक-क्षेत्रेणां कृते ऑरेंज अलर्ट इति नारङ्ग-वर्णिकी सचेतना

प्रासारिता अस्ति । अद्य आन्ध्रप्रदेशस्य, केरलस्य, लक्षद्वीपस्य च एकान्तस्थानेषु प्रचण्डवायोः संभावना विद्यते। केरलराज्ये कासरगोड्, कन्नूर्, वायनाड्, कोझिकोड इत्यादीनां जनपदानां कृते ऑरेंजअलर्ट इति नारङ्गवर्णीया सञ्चेतना, अन्येषां मण्डलानां च कृते येलो-अलर्ट इति पीतवर्णीया सञ्चेतनापि निर्गतास्ति ।

**अमित-शाह- जयपुरम्**

केन्द्रीय-गृह-सहकारिता-मंत्री अमित-शाहः अद्य राजस्थानस्य जयपुरनगरं निकषा समायोजिते सहकारिता-एवम-रोज़गार-उत्सव इत्यस्मिन् कार्यक्रमे भागम् अभजत् । श्रीशाहः आरक्षिस्थात्राणि, सशस्त्रबलसैनिकानां वाहकान् , प्रशिक्षणं च उद्दिश्य उपयुज्यमानानां शतं नवीन-वाहनानां हरितध्वजोत्थापनेन सह लोकार्पणं कृतवान् । तेन विभिन्न-योजनानां लाभार्थिभ्यः प्रमाणपत्राणि चेक इति धनाहरण-पत्राणि च वितरितानि सहैव सहयोगस्य विभिन्नाधारभूत-संरचनानां परियोजनाः समुद्घाटिताः । श्रीशाहः श्री-अन्न इत्यस्य प्रचाराय विश्वस्य बृहत्तमायाः अनाज-भंडारण-योजनायाः अन्तर्गतं निर्मितानां चतुर्विंशति-भण्डारणकेन्द्राणां , बाजरा इत्यस्य चतुषष्टिः केन्द्राणां च उद्घाटनम् अकरोत् । कार्यक्रमं सम्बोधयन् श्री-शाहः प्रोक्तवान् यत् सहकारि-समितिभिः विगतेभ्यः शतं वर्षेभ्यः देशस्य विकासे महत्वपूर्णं योगदानम् अयच्छत् । सः प्रोक्तवान् यत् आगम्यमानानि शत-वर्षाणि सहकारि-समितानां सन्ति । सः प्रोक्तवान् यत् अष्टनवति-प्रतिशतं ग्रामीण-क्षेत्रेषु सहकारि-समितीनां सक्रियभूमिका अस्ति ।

**नितिनगडकरी-समारोहः**

केंद्रीय-मार्ग-परिवहन-राजमार्ग-मंत्री नितिनगडकरी प्रोक्तवान् यत् वर्षान्तं यावत् देशस्य आपूर्ति-प्रबन्धनस्य मितिः अपचित्य नवप्रतिशन्मिता भविष्यति ।अद्य नवदिल्ल्यां एकस्य प्रसारमाध्यमस्य कार्यक्रमं सम्बोधयन् श्रीगडकरी प्रोक्तवान् यत् आपूर्ति-व्ययस्य अपचित्या भारतस्य निर्याते सार्धैक-प्रतिशन्मितस्य वृद्धि भविष्यति । सः प्रोक्तवान् यत् निर्यातवृद्धिना आधिकाधिकाः आजीविकावसराः समुत्पत्स्यन्ते सहैव आत्मनिर्भर-भारतं प्रति वय अग्रे सरिष्यामः । मंत्रिवर्यः एतदपि प्रकाशितवान् यद् सर्वकारःवायु-ध्वनि-जल-जीवाश्मेधनानां प्रदूषणात् मुक्तभारतस्य अभियाने अस्ति ।

**प्रज्ञानन्दः-चतुरङ्गक्रीडा**

चतुरङ्गक्रीडायां फ्रीस्टाइल-ग्रैण्ड-स्लैम इत्यस्मिन् भारतस्य ग्रैण्डमास्टर इति सर्वोत्कृष्ट-क्रीडकः आर् प्रज्ञानन्दः लास्-वेगस् इत्यत्र कार्लसन् मैग्नस् इत्येतं पराजित्य उपान्त्यचक्रे प्राविशत् ।

**।।इति वार्ता।।**